# P.G. 1st Semester - 2016

## SANSKRIT

**(CBCS)**

**Paper : 105**

Full Marks : 40 Time : 2 Hours

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

## MODULE - I

1. बङ्गभाषया अनुवादः करणीयः : 10

अतीव रमणीयः देशोऽयम् अस्माकम्। उत्तरस्यां दिशि हिमालयो नाम नगाधिराजः तिष्ठति । दक्षिणास्यां दिशि च महासागरः अस्य चरणौ प्रक्षालयति । न केवलं भौगोलिकदृष्ट्या अपितु सांस्कृतिकदृष्ट्या अपि अस्य देशस्य महत्त्वपूर्णस्थानं वर्तते । प्राचीनकाले देशोऽयं विश्वगुरुः आसीत् । भारतस्य इतिहासः अतीव प्राचीनः । देशान्तर बहवः विद्वांसः । अस्माद् देशाद् ज्ञानं नीतवन्तः । प्राचीनकाले बैदेशिकाः विद्यार्थिणः चात्र शिक्षार्थम् आगच्छन्ति स्म । वर्तमानसमयेऽपि अस्य महत्त्वपूर्णस्थानं वर्तते । अतः वयं भारतीयाः सर्वे गौरवान्विताः ।

**अथवा**

सम्प्रति जगति सर्वे जनाः सुखम् इच्छन्ति । सुखं शान्तिः च तदैव भवतः यदा मनुष्यः सन्तुष्टो भवति । यत् किञ्चित् स्वकीयेन परिश्रमेण प्रयत्नेन च प्राप्नोति, तत्रैव सुखानुभूतिकरणं सन्तोष इति । ये जनाः सन्तोषहीना भवन्ति ते असन्तुष्टा सन्तोऽन्यदपि धनं प्राप्तुमिच्छन्तो भ्रमन्ति । एवं तेषां जीवनं दुःखमयम् अशान्तियुक्तं च भवति । जीवने सुखशान्तिलाभाय सन्तोषस्य महत्यावश्यकता वर्तते । सन्तोषे एव सुखमस्ति, न चासन्तोषे । असन्तुष्टा मृगतृष्णिकामिव मायामनुसरन्तः सदा दुःखिता भवन्ति । अनुचितैः प्रकारैः धनस्योपार्जने यत्नं न कुर्यात् । अतः सर्वैरपि सुखशान्तिप्राप्त्यै सन्तोष उपादेयः ।

2. संस्कृतभाषया अनुवादः करणीयः : 10

ঈশ্বর সৃষ্টি কর্তা, ধর্ত্তা ও সংহর্তা । তিনিই জগতের নিয়ন্তা । বেদ অনন্ত । জগতের মঙ্গল সাধনের বেদশাস্ত্র যুগান্তে আবির্ভূত হয় । বৃদ্ধ মাতাপিতাকে পালন করবে । গুরুজনদের শ্রদ্ধা করলে জ্ঞান পাওয়া যায় । আমরা সবাই সর্বদাই যেন ঈশ্বরকে চিন্তা করি । অতিথিকে আসনাদি দ্বারা পূজা করা উচিত । মানুষের সেবা করলে ঈশ্বরের দর্শন হয় । অতএব ঈশ্বরের পূজা করা উচিত ।

**অথবা**

সংস্কৃত ভারতীয় সংস্কৃতির মূল । পৃথিবীর প্রাচীন ভাষাগুলির মধ্যে সংস্কৃত অন্যতম । সেটিই আমাদের ঐক্যবন্ধনের নিদান । ভারতবর্ষের যা ঐতিহ্য তা কিন্তু সংস্কৃতেরই



http://www.wbstudy.com

অধীন । রামায়ণ ও মহাভারত নামক মহাকাব্য দুটি এই ভাষাতেই রচিত । সংস্কৃতই আঞ্চলিক ভাষাগুলির প্রাণরূপ। আসমুদ্র হিমাচলের তীর্থে তীর্থে সংস্কৃতের উদাত্ত মন্ত্র পাওয়া যায়। এটি একটি বৈজ্ঞানিক ভাষা । প্রাচীন কালে এই ভাষায় সবাই কথা বলতেন । তাই এই ভাষাটি অবশ্যই আমাদের সবাইকে শেখা উচিত ।

## MODULE - II

3. अधोलिखितम् अनुच्छेदं पठित्वा पृष्टाणां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखनीयानि : 5×2=10

कस्मिंश्चित् नगरे देवशर्मा नाम ब्राह्मणः आसीत् । तस्य भार्या यस्मिन् दिने एकं सुतमजनयत्तस्मिन्नेव दिने काचिन्नकुली तत्रैव एकं नकुलं प्रसूय अम्रियत । सुतवत्सला ब्राह्मणी तं नकुलमपि पुत्रवत्पर्यपालयत् । किन्तु सा सततं नकुले आशङ्कत यत्— ''कदाचित्स्वजातिदोषवशादेषः नकुलः मम प्रियस्य पुत्रस्य विरुद्धमाचरिष्यति'' इति । ततः सा एकदा शय्यायां पुत्रं शाययित्वा जलकुम्भमादाय पतिमभाषत यत्—''आर्य ! जलार्थमहं तडागे यामि, भवान्पुत्रं संरक्षतु'' इति । तदनन्तरं ब्राह्मणः अश्रृणोद् यत् कश्चन महात्मा दरिद्रेभ्यः प्रभूतं धनं दत्ते । ''तत्र अहमपि किञ्चित्प्राप्स्यामि'' इति ब्राह्मणः व्यचिन्तयत् । स बालकस्य रक्षाणार्थं पुत्रवत्पालितं नकुलं नियोज्य स्वयं निरगच्छत् । अत्रान्तरे एकः भयङ्करः कृष्णसर्पः तत्र समागच्छत् । ''अयं दुष्टः अवश्यं मे भ्रातुः दशनं करिष्यतीति'' नकुलः व्यचिन्तयत् सर्पेण सह युद्धं प्रारभत एवं सर्पं खण्डशः अकुरुत । जलकुम्भम् आनयन्ती माता द्वारे एव तस्य रुधिरप्लावितं मुखं निरैक्षत । ''एषः दुरात्मा मे पुत्रम् अभक्षयत्'' इति शङ्कया कोपात्तस्योपरि जलकुम्भं निक्षिप्य तममारयत् । अत्रान्तरे ब्राह्मणोऽपि उपागच्छत् । तौ उभौ गृहाभ्यन्तरमागत्य सुखेन सुप्तं पुत्रमवलोकेताम् । पार्श्वे च खण्डशकृतं कृष्णसर्पम् अवलोक्य नकुलाय अतीव सन्तापम् अप्राप्नुयाताम् । अतः कदाचिदप्यविचार्य किमपि न करणीयम्।

सर्वे प्रश्नाः समाधेया :

१) ब्राह्मणस्य नाम किमासीत् ? नकुलः क खण्डशां कृतवान् ?

२) ब्राह्मणस्य भार्यायाः मनसि का आशंका आसीत् ? ब्राह्मणेन बालकस्य रक्षार्थं कः नियुक्तः ?

३) ब्राह्मणी ब्राह्मणं किम् अभाषत ? नकुलः सर्पं दृष्ट्वा किं व्यचिन्तयत् ?

४) ब्राह्मणी नकुलं किमर्थम् अमारयत् ? 'कृष्णसर्पः' इत्यत्र कः समासः?

५) अनुच्छेदे प्रयुक्तानि 'ल्यबन्त' पदानां द्वयं लिखत । 'कस्मिंश्चित्' इत्यस्य सन्धिविच्छेदः करणीयः ।

4. अधोलिखितं श्लोकं सम्पठ्य पृष्टाणां प्रश्नानां उत्तराणि प्रदेयानि : 5×2=10

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥

सर्वे प्रश्नाः समाधेयाः :

१) नरः कानि विहाय कानि गृह्णाति ?



http://www.wbstudy.com

२) देही कानि विहाय कानि संयाति ?

३) श्लोके नपुंसकशब्दान् चित्वा लिख्यताम् ।

४) ल्यबन्तमव्ययं दर्शय ।

५) 'वासस्' शब्दस्य प्रथमान्तरूपाणि लिखत ।

## MODULE - III

5. अधस्तनेषु **एकस्य** निबन्धः लेखनीयः : 10×1=10

१) वेदानां महत्तम् ।

२) संगणकयन्त्रस्य संस्कृतभाषायाम् उपयोगः ।

३) गीता सुगीता कर्तव्या ।

४) स्त्रीशिक्षायाः आवश्यकतोपयोगिता च ।

५) काश्मीरसमस्या तस्याःसमाधानोपायाश्च ।

६) जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।



http://www.wbstudy.com